व्यावृत्तिः, स्त्री, ( वि+आ+वृत्+क्तिन् । ) खण्डनम् । यथा,—
"अतीतः पन्थानं तव च महिमा वाङ्मनसयो-
रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि ।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः ।
पदे त्वर्व्वाचीने पतति न मनः कस्य न वचः ॥"
इति महिम्नस्तोत्रम् ॥
व्यावृत्तिः । यथा । सर्व्वसपक्षव्यावृत्तिरेव दोषो न विपक्षव्यावृत्तिरपि तस्यानुगुणत्वात् । इति चिन्तामणौ असाधारणग्रन्थः ॥

व्यासः, पुं, ( वि+अस्+घञ् । ) विस्तारः । इत्यमरः ॥ ( यथा, महाभारते । १ । १ । ५१ ।
"विस्तीर्य्यैतत् महज्ज्ञानमृषिः संक्षिप्य चाब्रवीत् ।
इष्टं हि विदुषां लोके समासव्यासधारणम् ॥"
"समासः संक्षेपः व्यासो विस्तारः ।" इति तट्टीका ॥ ) मानभेदः । इति शब्दरत्नावली ॥ पाठकब्राह्मणः । यथा, नैयतकालिकतत्त्वतरौ भविष्यपुराणम् ॥
"विस्पष्टमद्रुतं शान्तं स्पष्टाक्षरपदं तथा ।
कलस्वरसमायुक्तं रसभावसमन्वितम् ॥
बुध्यमानः सदर्थं वै ग्रन्थार्थं कृत्स्नशो नृप ।
ब्राह्मणादिषु सर्व्वेषु ग्रन्थार्थं चार्पयेन्नृप ।
य एवं वाचयेद्ब्रह्मन् स विप्रो व्यास उच्यते ॥"
इति तिथ्यादितत्त्वम् ॥
गोलस्य मध्यरेखा । यथा,—
"व्यासे भनन्दाग्निहते विभक्ते
खबाणसूर्य्यैः परिधिस्तु सूक्ष्मः ।
द्वाविंशतिघ्ने विहृतेऽथ शैलैः
स्थूलोऽथवा स्याद्व्यवहारयोग्यः ॥"
उदाहरणम् ।
"विष्कम्भमानं किल यत्र सप्त
तत्र प्रमाणं परिधिः प्रचक्ष्व ।
द्वाविंशतिर्यत् परिधिप्रमाणं
तद्व्याससंख्या च सखे विचिन्त्य ॥"
इति लीलावती ॥*॥
( व्यस्यति वेदानिति । वि+आ+अस्+अच् । ) मुनिविशेषः । तस्य पर्य्यायो वेदव्यासशब्दे द्रष्टव्यः ॥ ( अस्य निरुक्तिर्यथा महाभारते । १ । १०५ । १४ ।
"यो व्यस्य वेदांश्चतुरस्तपसा भगवानृषिः ।
लोके व्यासत्वमापेदे कार्ष्ण्यात् कृष्णत्वमेव च ॥")
स च सत्यवत्यां कन्याकाले पराशराज्जातः । श्रीकृष्णस्य पञ्चकलोद्भवः । यथा,—
"व्यासः पुराणसूत्रञ्च पप्रच्छ वाल्मिकं यदा ।
मौनीभूतः स सस्मार त्वामेव जगदम्बिकाम् ॥
तदा चकार सिद्धान्तं त्वद्वरेण मुनीश्वरः ।
संप्राप निर्म्मलं ज्ञानं भ्रमान्धध्वंसदीपकम् ॥
पुराणसूत्रं श्रुत्वा स व्यासः पञ्चकलोद्भवः ।
त्वां सिषेवे प्रदध्यौ च शतवर्षञ्च पुष्करे ।
तदा त्वत्तो वरं प्राप्य स कवीन्द्रो बभूव ह ।
तदा वेदविभागञ्च पुराणञ्च चकार ह ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४ अध्यायः ॥*॥
तस्य जन्मान्तरं यथा,—
"अथ भूयो जगत्स्रष्टा भोः शब्देनानुवादयन् ।
सरस्वतीमुच्चचार तत्र सारस्वतोऽभवत् ॥
अपान्तरतमा नाम सुतो वाक्सम्भवः प्रभुः ।
भूतभव्यभविष्यज्ञः सत्यवादी दृढव्रतः ॥
तमुवाच नतं मूर्द्ध्ना देवानामादिरव्ययः ।
वेदाख्याने श्रुतिः कार्य्या यथा मतिमतां वर ॥
तस्मात् कुरु यथाज्ञप्तं ममैतद्वचनं मुने ।
तेन भिन्नास्तदा वेदा मनोः स्वायम्भुवेऽन्तरे ॥
ततस्तुतोष भगवान् हरिस्तेनास्य कर्म्मणा ।
तपसा च सुतप्तेन यमेन नियमेन च ॥
मन्वन्तरेषु पुत्त्रत्वमेवमेवं प्रवर्त्तकः ।
भविष्यस्यचलो ब्रह्मन्नप्रधृष्यश्च नित्यशः ॥"
इति महाभारते मोक्षधर्म्मः ॥*॥
अन्यच्च ।
"सुतं त्वजनयच्छक्तेरदृश्यन्ती पराशरम् ।
काली पराशरात् जज्ञे कृष्णद्वैपायनं मुनिम् ॥
द्वैपायनादरण्यां वै शुको जज्ञे गुणान्वितः ।"
इति वह्निपुराणे प्रजापतिसर्गो नामाध्यायः ॥*
युगभेदे व्यासभेदो यथा,—
"यस्मिन्मन्वन्तरे व्यासा ये ये तांस्तान्निबोध मे ।
यथा च भेदः शाखानां व्यासेन क्रियते मुने ॥
अष्टाविंशतिकृत्वो वै वेदो व्यस्तो महर्षिभिः ।
वैवस्वतेऽन्तरे त्वस्मिन् द्वापरेषु पुनः पुनः ॥
वेदव्यासा व्यतीता ये अष्टाविंशतिसत्तमाः ।
चतुर्धा यैः कृतो वेदो द्वापरेषु पुनः पुनः ॥
द्वापरे प्रथमे व्यस्ताः स्वयं वेदाः स्वयम्भुवा ।
द्वितीये द्वापरे चैव वेदव्यासः प्रजापतिः ॥
तृतीये चोशना व्यासश्चतुर्थे तु बृहस्पतिः ।
सविता पञ्चमे व्यासो मृत्युः षष्ठे स्मृतः प्रभुः ॥
सप्तमे च तथैवेन्द्रो वशिष्ठश्चाष्टमे स्मृतः ।
सारस्वतश्च नवमे त्रिधामा दशमे स्मृतः ॥
एकादशे वै त्रिवृषो भारद्वाजस्ततः परम् ।
त्रयोदशे चान्तरीक्षो धर्म्मौ चापि चतुर्द्दशे ।
त्रय्यारुणः पञ्चदशे षोडशे तु धनञ्जयः ।
कृतञ्जयः सप्तदशे ऋणज्योऽष्टादशे स्मृतः ॥
ततो व्यासो भरद्वाजो भरद्वाजात्तु गौतमः ।
गौतमादुत्तमो व्यासो हर्य्यात्मा योऽभिधीयते ॥
अथ हर्य्यात्मनो वेनः स्मृतो वाजश्रवास्तु यः ।
सोमो मुख्यायनस्तस्मात् तृणबिन्दुरिति स्मृतः ।
ऋक्षोऽभूद्भार्गवस्तस्माद्वाल्मीकिर्योऽभिधीयते ।
तस्मादस्मत्पिता शक्तिर्व्यासस्तस्मादहं मुने ।
जातुकर्णोऽभवत्तस्मात् कृष्णद्वैपायनस्ततः ।
अष्टाविंशतिरित्येते वेदव्यासाः पुरातनाः ॥
एको वेदश्चतुर्धा तु तैः कृतो द्वापरादिषु ।
भविष्ये द्वापरे चापि द्रौणिर्व्यासो भविष्यति ।
व्यतीते मम पुत्त्रेऽस्मिन् कृष्णद्वैपायने मुनौ ॥"
इति विष्णुपुराणे ३ अंशे ३ अध्यायः ॥*॥
कूर्म्मपुराणे त्वियान् विशेषः । द्वादशे द्वापरे शततेजाः । त्रयोदशे धर्म्मः । चतुर्द्दशे तरक्षुः । पञ्चदशे त्र्यारुणः । अष्टादशे ऋतञ्जयः । एकविंशे वाजश्रवाः । द्वाविंशे शुष्मायणः । त्रयोविंशे तृणबिन्दुः । चतुर्व्विंशे वाल्मीकिः । पञ्चविंशे शक्तिः । अन्यत् विष्णुपुराणवत् ॥ ( एतद्विवरणञ्च देवीभागवते १ स्कन्धे ३ अध्याये च द्रष्टव्यम् ॥ )

व्यासक्तः, त्रि, ( वि+आ+सञ्ज+क्तः । ) विशेषेणासक्तः । संलग्नः । यथा,—
"व्याकोषेन्दीवराभा कनकपरिलसत्पीतवासाः सहासा
बर्हैरुच्चन्द्रकान्तैर्व्वलयितचिकुरा चारुकर्णावतंसा ।
अंसव्यासक्तवंशध्वनिसुखितजगद्वल्लवीभिर्लसन्ती
मूर्त्तिर्गोपस्य विष्णोरवतु जगति नः स्रग्धरा हारिहारा ॥"
इति छन्दोमञ्जरी ॥

व्यासङ्गः, पुं, विशेषेण आसङ्गः । वि-आङ्पूर्व्वसन्जधातोर्घञ्प्रत्ययेन निष्पन्नमेतत् ॥

व्यासमाता, [ ऋ ] स्त्री, ( व्यासस्य माता । ) वेदव्यासजननी । इति त्रिकाण्डशेषः ॥ तत्पर्य्यायः । सत्यवती १ वासवी २ गन्धकालिका ३ योजनगन्धा ४ दाशेयी ५ शालङ्कायनजा ६ । इति हेमचन्द्रः ॥ ग्रन्थान्तरे शालङ्कायनजा इति च पाठः । काली ७ झषोदरी ८ विचित्रवीर्य्यसूः ९ चित्राङ्गदसूः १० योजनगन्धिका ११ । इति त्रिकाण्डशेषः ॥ गन्धकाली १२ सत्या १३ दासनन्दिनी १४ । इति शब्दरत्नावली ॥

व्यासिद्धः, त्रि, (वि+आ+सिध+क्तः ।) निषिद्धः । इति मिताक्षरा ॥

व्याहतः, त्रि, ( वि+आ+हन+क्तः । ) विशेषेणाहतः । व्यर्थः । यथा । तुल्यव्यासक्तमनसाश्चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात् तेषापदेशाज्ज्ञानविशेषाणां व्याहतत्वादहेतुः । इति गौतमसूत्रे प्रत्यक्षपरीक्षाप्रकरणम् ॥ अपि च ।
"अव्याहताज्ञः सर्व्वासु यः सदा देवयोनिषु ।
निर्ज्जिताखिलदैत्यारिः स यदाह शृणुष्व तत् ॥"
इति देवीमाहात्म्यम् ॥

व्याहारः, पुं, (वि+आ+हृ+घञ् ।) वाक्यम् । इत्यमरः ॥ ( यथा, बृहत्संहितायाम् । ४६ । ७१ ।
"खभिरशिवरावयवप्रवेशनं मन्दिरेषु नरकाय ।
पशुशस्त्रव्याहारे नृपस्तुमुर्निवर्त्तेदम् ॥")

व्याहृतिः, स्त्री, ( वि+आ+हृ+क्तिन् । ) व्याहारः । मन्त्रविशेषः । यथा,—
"ॐकारमादितः कृत्वा व्याहृतिस्तदनन्तरम् ।
ततोऽधीयीत सावित्रीमेकाग्रश्रद्धयान्वितः ॥
पुराकल्पे समुत्पन्ना भूर्भुवःस्वःसनातनाः ।
महाव्याहृतयस्तिस्रः सर्व्वाशुभनिवर्हणाः ॥
प्रधानपुरुषः कालो ब्रह्मविष्णुमहेश्वराः ।
सत्त्वं रजस्तमस्तिस्रः क्रमाद्व्याहृतयः स्मृताः ॥